श्री शिव स्तवराजः (बाणेश्वर कवच सहितं) - ब्रह्मवैवर्त पुराणांतर्गतं

श्री शिव स्तवराजः (बाणेश्वर कवच सहितं) - ब्रह्मवैवर्त पुराणांतर्गतं

ॐ नमो महादेवाय |

कवचं

बाणासुर उवाच |
महेश्वर महाभाग कवचं यत्प्रकाशितं |
संसारपावनं नाम कृपया कथय प्रभो || 43 ||

महेश्वर उवाच |
शृणु वक्ष्यामि हे वत्स कवचं परमाद्भुतं |
अहं तुभ्यं प्रदास्यामि गोपनीयं सुदुर्लभं || 44 ||

पुरा दुर्वाससे दत्तं त्रैलोक्यविजयाय च |
ममैवेदं च कवचं भक्त्या यो धारयेत्सुधीः || 45 ||

जेतुं शक्नोति त्रैलोक्यं भगवन्नवलीलया |
संसारपावनस्यास्य कवचस्य प्रजापतिः || 46 ||

ऋषिश्छंदश्च गायत्री देवोऽहं च महेश्वरः |
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः || 47 ||

पंचलक्षजपेनैव सिद्धिदं कवचं भवेत् |
यो भवेत्सिद्धकवचो मम तुल्यो भवेद्भुवि |
तेजसा सिद्धियोगेन तपसा विक्रमेण च || 48 ||

शंभुर्मे मस्तकं पातु मुखं पातु महेश्वरः |
दंतपंक्तिं नीलकंठोऽप्यधरोष्ठं हरः स्वयं || 49 ||

कंठं पातु चंद्रचूडः स्कंधौ वृषभवाहनः |
वक्षःस्थलं नीलकंठः पातु पृष्ठं दिगंबरः || 50 ||

सर्वांगं पातु विश्वेशः सर्वदिक्षु च सर्वदा |
स्वप्ने जागरणे चैव स्थाणुर्मे पातु संततं || 51 ||

इति ते कथितं बाण कवचं परमाद्भुतं |
यस्मै कस्मै न दातव्यं गोपनीयं प्रयत्नतः || 52 ||

यत्फलं सर्वतीर्थानां स्नानेन लभते नरः |
तत्फलं लभते नूनं कवचस्यैव धारणात् || 53 ||

इदं कवचमज्ञात्वा भजेन्मां यः सुमंदधीः |
शतलक्षप्रजप्तोऽपि न मंत्रः सिद्धिदायकः || 54 ||

सौतिरुवाच |
इदं च कवचं प्रोक्तं स्तोत्रं च शृणु शौनक |
मंत्रराजः कल्पतरुर्वसिष्ठो दत्तवान्पुरा || 55 ||

ॐ नमः शिवाय |

स्तवराजः

बाणासुर उवाच |
वंदे सुराणां सारं च सुरेशं नीललोहितं |
योगीश्वरं योगबीजं योगिनां च गुरोर्गुरुं || 56 ||

ज्ञानानंदं ज्ञानरूपं ज्ञानबीजं सनातनं |
तपसां फलदातारं दातारं सर्वसंपदां || 57||

तपोरूपं तपोबीजं तपोधनधनं वरं |
वरं वरेण्यं वरदमीड्यं सिद्धगणैर्वरैः || 58 ||

कारणं भुक्तिमुक्तीनां नरकार्णवतारणं |
आशुतोषं प्रसन्नास्यं करुणामयसागरं || 59 ||

हिमचंदन कुंदेंदु कुमुदांभोज सन्निभं |
ब्रह्मज्योतिः स्वरूपं च भक्तानुग्रहविग्रहं || 60 ||

विषयाणां विभेदेन बिभ्रतं बहुरूपकं |
जलरूपमग्निरूप-माकाशरूपमीश्वरं || 61 ||

वायुरूपं चंद्ररूपं सूर्यरूपं महत्प्रभुं |
आत्मनः स्वपदं दातुं समर्थमवलीलया || 62 ||

भक्तजीवनमीशं च भक्तानुग्रहकारकं |
वेदा न शक्ता यं स्तोतुं किमहं स्तौमि तं प्रभुं || 63 ||

अपरिच्छिन्नमीशान-महोवाङ्मनसोः परं |
व्याघ्रचर्मांबरधरं वृषभस्थं दिगंबरं |
त्रिशूलपट्टिशधरं सस्मितं चंद्रशेखरं || 64 ||

इत्युक्त्वा स्तवराजेन नित्यं बाणः सुसंयतः |
प्राणमच्छंकरं भक्त्या दुर्वासाश्च मुनीश्वरः || 65 ||

इदं दत्तं वसिष्ठेन गंधर्वाय पुरा मुने |
कथितं च महास्तोत्रं शूलिनः परमाद्भुतं || 66 ||

इदं स्तोत्रं महापुण्यं पठेद्भक्त्या च यो नरः |
स्नानस्य सर्वतीर्थानां फलमाप्नोति निश्चितं || 67 ||

अपुत्रो लभते पुत्रं वर्षमेकं शृणोति यः |
संयतश्च हविष्याशी प्रणम्य शंकरं गुरुं || 68 ||

गलत्कुष्ठी महाशूली वर्षमेकं शृणोति यः |
अवश्यं मुच्यते रोगाद्व्यासवाक्यमिति श्रुतं || 69 ||

कारागारेऽपि बद्धो यो नैव प्राप्नोति निर्वृतिं |
स्तोत्रं श्रुत्वा मासमेकं मुच्यते बंधनाद्ध्रुवं || 70 ||

भ्रष्टराज्यो लभेद्राज्यं भक्त्यामासं शृणोति यः |
मासं श्रुत्वा संयतश्च लभेद्भ्रष्टधनो धनं || 71 ||

यक्ष्मग्रस्तो वर्षमेकमास्तिको यः शृणोति चेत् |
निश्चितं मुच्यते रोगाच्छंकरस्य प्रसादतः || 72 ||

यः शृणोति सदा भक्त्या स्तवराजमिमं द्विजः |
तस्यासाध्यं त्रिभुवने नास्ति किंचिच्च शौनक || 73 ||

कदाचिद्बंधुविच्छेदो न भवेत्तस्य भारते |
अचलं परमैश्वर्यं लभते नात्र संशयः || 74 ||

सुसंयतोऽति भक्त्या च मासमेकं शृणोति यः |
अभार्यो लभते भार्यां सुविनीतां सतीं वरां || 75 ||

महामूर्खश्च दुर्मेधा मासमेकं शृणोति यः |
बुद्धिं विद्यां च लभते गुरूपदेशमात्रतः || 76 ||

कर्मदुःखी दरिद्रश्च मासं भक्त्या शृणोति यः |
ध्रुवं वित्तं भवेत्तस्य शंकरस्य प्रसादतः || 77 ||

इह लोके सुखं भुक्त्वा कृत्वाकीर्तिं सुदुर्लभां |
नाना प्रकार धर्मं च यात्यंते शंकरालयं || 78 ||

पार्षदप्रवरो भूत्वा सेवते तत्र शंकरं |
यः शृणोति त्रिसंध्यं च नित्यं स्तोत्रमनुत्तमं || 79 ||

इति श्रीब्रह्मवैवर्ते महापुराणे ब्रह्मखंडे सौतिशौनकसंवादे शंकरस्तोत्र कथनं नाम एकोनविंशोध्यायः ||